१३

अध्यासलक्षणविचारः

प्रस्तावना

धर्मः अर्थः कामः मोक्षः इति चत्वारः पुरुषार्थाः। प्रत्येकं पुरुषार्थानां लाभोपायं प्रतिपादयितुं शास्त्राणि रचितानि। मन्वादिप्रणीतानि धर्मशास्त्राणि, कौटिल्यशुक्रादिप्रणीतानि अर्थशास्त्राणि, वात्स्यायनादिप्रणीतानि कामशास्त्राणि च लोके प्रथितानि। दर्शनानि हि मोक्षशास्त्राणि। भारतीयदर्शनानि आस्तिकनास्तिकभेदेन द्विधा विभक्तानि। यानि दर्शनानि वेदस्य प्रामाण्यमभ्युपगच्छन्ति तानि आस्तिकानि, यानि च तत् नाभ्युपगच्छन्ति तानि नास्तिकानि। चार्वाक-जैन-बोद्धदर्शनानि नास्तिकानि, सांख्य-योग-न्याय-वैशेषिक-पूर्वमीमासोत्तरमीमासादर्शनानि आस्तिकदर्शनानि। कर्मकाण्डान्तर्गतानां वेदवाक्यानां विचारः पूर्वमीमांसादर्शने भवति। ज्ञानकाण्डरूपाणाम् उपनिषदां विचारः उत्तरमीमांसादर्शने भवति। उत्तरमीमांसादर्शनस्यैव वेदान्त इत्यपरं नाम। उपनिषदः, श्रीमद्भगवद्गीता, ब्रह्मसूत्रम् इति प्रस्थानत्रयमाधारीकृत्य वेदान्तानां प्रपञ्चो भवति। प्रस्थानत्रयस्य बहुविधव्याख्यानदर्शनात् बहवो वेदान्ताः अद्वैत-विशिष्टाद्वैत-द्वैत-द्वैताद्वैत-भेदाभेदादयः प्रादुर्भूताः। एतेषु सर्वेषु शङ्कराचार्येण उपबृंहितः अद्वैतवेदान्त एव सर्वातिशायितया विराजतेतराम्।

ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः इति अद्वैतवेदान्तस्य प्रतिपाद्यविषयाणां सारः। ब्रह्मणः स्वरूपस्य अतीत-वर्तमान-भविष्यत्कालेषु परिवर्तनं न भवति, अतो ब्रह्म सत्यम्। अतः शङ्कराचार्यः तैत्तिरीयोपनिषदः भाष्ये कथयति – यद्रूपेण यन्निश्चितं तद्रूपं न व्यभिचरति तत् सत्यम् इति। सत्यं नित्यमिति अनर्थान्तरम्। किञ्च, ब्रह्म शुद्धम् अविद्यादिदोषशून्यत्वात्, बुद्धम् अजडत्वात्, मुक्तं तस्य बन्धासम्भवात्, आनन्दस्वरूपं च परप्रेमास्पदत्वात्। यत् यत्र प्रतीयते, परवर्तिकाले उत्पन्नेन यथार्थज्ञानेन तत्रैव तत् निषिध्यते चेत् तत् मिथ्या भवति। अनुभूयमानं जगदिदमुत्पद्यते नश्यति च, अतो न सत्। नापि शशशृङ्गवत् असत्, यतो हि जगतः प्रतीतिरस्ति। न वा जगत् सदसदुभयात्मकम्, परस्परविरुद्धधर्मयोः एकत्र असम्भवात्। अतो जगत् सदसद्भ्याम् अनिर्वचनीयम्। ब्रह्म एव स्वस्मिन् आरोपितायाः मायायाः कार्येण अन्तःकरणेन उपहितः सन् जीवो भवति; यथा आकाशः एकोऽपि घटरूपोपाधिना सह सम्पर्कात् घटाकाशो भवति तद्वत्। अन्तःकरणानि बहूनि, अतो जीवा अपि बहवः। तेषु यः शास्त्राचार्योपदेशैः शमदमादिना च संस्कृतेन मनसा श्रवण-मनन-निदिध्यासनैः स्वस्य ब्रह्मस्वरूपत्वं साक्षात्करोति सः मुच्यते। मुक्तिश्च आत्यन्तिकदुःखनिवृत्तिः स्वस्वरूपानन्दावाप्तिश्च। सा मुक्तिः श्रवणादिभिः ब्रह्माकारचित्तवृत्तेरुदयेन अज्ञाननाशात् सिद्ध्यति।

अद्वैतवेदान्तशास्त्रावबोधाय ब्रह्ममायादिज्ञानेन सह अध्यासस्य ज्ञानमपि सुतरामपेक्षितम्। अध्यासज्ञानं विना निर्गुणस्य ब्रह्मणः कथं जीवत्वं, जीवस्य च कथं कर्तृत्वभोक्तृत्वादिबन्धः, कथं च अध्यस्तानां बन्धानां निवृत्तिः इत्यादयो विषया ज्ञातुं न शक्यन्ते। अखिलस्य जगतः ब्रह्मणि अध्यस्तत्वात् जगतो मिथ्यात्वमिति निश्चेतुम् कोऽयमध्यासः, किं तत्र कारणम्, के तस्य अध्यासस्य भेदाः, कथं सर्वविधानां लौकिकानां शास्त्रीयाणां च व्यवहाराणाम् अध्यासपूर्वकता, कथं चाध्यासस्य निवृत्तिः इत्यादिविषयाः सुतरां ज्ञातव्याः। अस्मिन्पाठे वयं तानेवांशान् आलोच्य पठामः।

उद्देश्यानि

अस्मिन् पाठे अधोलिखितान् विषयान् ज्ञातुं शक्नुवन्ति छात्राः –

- अद्वैतवेदान्ते अध्यासालोचनस्य किं तावत् प्रयोजनम्।
- अध्यासपदस्य व्युत्पत्तिगतः अर्थः कः।
- अध्यासलक्षणम्, अध्यासलक्षणविचारे मतभेदाः
- अध्यासस्य भेदाः
- अध्याससत्त्वे प्रमाणम्
- लौकिकानां शास्त्रीयाणां च व्यवहाराणाम् आध्यासिकत्वम्

१३.१) अध्यासप्रयोजनम्

अद्वैतवेदान्ते प्रतिपाद्यविषयः तावत् जीवब्रह्मणोरैक्यम्, मुक्तिश्च शास्त्रस्यास्य प्रयोजनम्। जीवब्रह्मणोः ऐक्यं लोके प्रसिद्धं चेत् न हि तज्ज्ञानाय अद्वैतवेदान्ते प्रज्ञावतां प्रवृत्तिः स्यात्। परन्तु अस्ति हि लोके अनुभवः शरीरेन्द्रियमनोबुद्ध्यादिभिः अवच्छिन्नः जीवो शास्त्रप्रतिपादितात् नित्यशुद्धबुद्धमुक्तस्वभावात् ब्रह्मणो भिन्नः इति।जीवब्रह्मणोः अयं भेदः तात्त्विकः चेत् न हि शास्त्रशतैः सः दूरीकर्तुं शक्यते। अतो जीवब्रह्मैक्यरूपविषयसिद्धये आदौ ब्रह्म एव अज्ञानकारणात् जीवो भवति इति ब्रह्मणः जीवत्वम् मिथ्या अध्यासकार्यमिति प्रतिपादनीयम्। अध्यासस्वरूपस्य ज्ञानं विना जीवस्य अध्यासकार्यत्वं नैव बुद्धिगोचरं भवतीति अध्यासः आदावेव आलोचनविषयतां याति।

किञ्च, बन्धनिवृत्तेर्हि मोक्षः सम्भवति। जीवस्य अविद्यादिकृतबन्धः यदि पारमार्थिकः तर्हि न केनाप्युपायेन तस्य निवृत्तिः सम्भवति। बन्धनिवृत्तेरसम्भवाच्च मुक्त्यसिद्धेः वेदान्तशास्त्रमेव विफलं स्यात्, न स्यात् तत्र प्रवृत्तिर्मुमुक्षूणाम्। अत्रोच्यते, न हि अविद्यादिकृत-कर्तृत्वभोक्तृत्वादिबन्धः पारमार्थिकः। बन्धोऽयं ब्रह्मणि आरोपितः, जीवस्य स्वस्वरूपज्ञाने सति एतेषां मिथ्याभूतानां बन्धानां निवृत्तिर्भवति, यथा हि रज्जुस्वरूपज्ञाने सति मिथ्याभूतसर्पस्य निवृत्तिर्भवति तद्वत्। छान्दोग्योपनिषदि श्रूयते च – तरति शोकम् आत्मवित् इति। अतोऽद्वैतवेदान्तस्य प्रयोजनसिद्धये बन्धस्य मिथात्वस्य अध्यस्तत्वस्य च प्रतिपादनार्थम् अध्यारोपापरपर्यायस्य अध्यासस्य लक्षणप्रमाणज्ञानं सुतरामपेक्षितम्।

वेदान्तशास्त्रेषु ब्रह्मविचारः प्रस्तुतः। विचारश्च सन्दिग्धे सप्रयोजने च विषये सम्भवति। ननु सर्वेषामेव अहमिति प्रत्यये भासमानत्वात् न हि ब्रह्म सन्दिग्धम्। आत्मनो यथार्थस्वरूपस्य ज्ञानेन भवति

संसारनिवृत्तिः, न च लोकप्रसिद्धात् आत्मानुभवात् अन्यः आत्मनो यथार्थस्वरूपस्य अनुभवो विद्यते। तादृशे आत्मयाथात्म्यानुभवे सत्यपि संसारस्य निवृत्त्यभावात् न हि ब्रह्मणः प्रयोजनमपि किञ्चिदस्ति। अतः सन्दिग्धत्वसप्रयोजनत्वाभावात् न विचार्यं ब्रह्म। अत्रोच्यते, प्राकृतानां जनानां अहमित्यनुभवे न हि श्रुतिप्रतिपाद्यं नित्यशुद्धबुद्धमुक्तस्वभावम् असंसारि आत्मतत्त्वं भासते। देहेन्द्रियमनोबुद्ध्यादीन् विषयान् तद्धर्मांश्च आत्मनि अध्यस्यैव अहं गौरः, अहं काणः, अहं सन्दिग्धे, अहं निश्चिनोमि इत्यादिव्यवहाराः प्रवर्तन्ते। अतः आध्यासिक एव अहमनुभवः साधारणजनानाम्। न केवलं साधारणजनानां पण्डितानामपि अहमनुभवः तदनुयायिलौकिकव्यवहारश्च अध्यासपूर्वकः एव। अतः जीवानां यथार्थब्रह्मस्वरूपस्य ज्ञानाभावात् तज्ज्ञानलाभाय विचार्यं ब्रह्मेति आपतति। श्रुतिप्रतिपादितब्रह्मणः साक्षात्कारे सति शुकवामदेवादीनामिव मोक्षः ध्रुव एव। अतो ब्रह्मविचारस्य सप्रयोजनत्वमपि सिद्ध्यति। अत इदं ब्रह्म सामान्यतो ज्ञातं विशेषतः अज्ञातम्। तथाहि देहेन्द्रियादिषु अध्यासवशात् देहेन्द्रियादिभिः अभिन्नतया ब्रह्म सामान्यतः सर्वैर्विज्ञायते। परन्तु सर्वोपाधिविनिर्मुक्ततया विशेषतो ब्रह्मणः ज्ञानं नैव जीवानामस्ति। अतो विचार्यं ब्रह्म। उच्यते च मण्डनमिश्रेण ब्रह्मसिद्धौ –

सर्वप्रत्ययवेद्ये वा ब्रह्मरूपे व्यवस्थिते।

प्रपञ्चस्य प्रविलयः शब्देन प्रतिपाद्यते॥ इति।

अध्यासप्रतिपादनं विना नैव ब्रह्मणः सन्दिग्धत्वं सप्रयोजनत्वं च प्रतिपादयितुं शक्यते, न च तेन विचार्यत्वं ब्रह्मणः शक्यते प्रतिपादयितुमिति अध्यासस्य आलोचनं सुतरामपेक्ष्यते।

उपनिषद आधारीकृत्य एव वेदान्तशास्त्राणां प्रवृत्तिः। उच्यते च शङ्कराचार्येण जन्माद्यधिकरणभाष्ये – वेदान्तवाक्य-कुसुम-ग्रथनार्थत्वात् सूत्राणाम् इति। उपनिषत्सु विधिमुखेन निषेधमुखेन च ब्रह्मस्वरूपं प्रतिपाद्यते। तथाहि निषेधद्वारकब्रह्मप्रतिपादकानि उपनिषद्वाक्यानि तावत् – नेह नानास्ति किञ्चन, अशब्दमस्पर्शमरूपमव्ययम्, अवाङ्मनसगोचरम् इत्यादीनि। विधिमुखेन ब्रह्म प्रतिपादयन्ति – सत्यं ज्ञानमनन्तं ब्रह्म, सर्वं खल्विदं ब्रह्म, सच्चिदानन्दं ब्रह्म इत्यादीनि उपनिषद्वाक्यानि। अत्र चायं पर्यनुयोगः – ननु इह ब्रह्मणि नानाभावात् कथं सर्वं खल्विदं ब्रह्म इति ब्रह्मणः सर्वव्यापकता सिध्यति। अत उपनिषद्वाक्यानां मिथो विरोधात् न हि प्रामाण्यं तेषां, अपास्तं च प्रामाण्यं तदाश्रितानां वेदान्तशास्त्राणाम्। अत्रोच्यते, न हि उपनिषद्वाक्यानां मिथो विरोधोऽस्ति। निषेधमुखेनैव ब्रह्मस्वरूपं सुवचम्। न हि ब्रह्मणि नानात्वमस्ति। न चानेन ब्रह्मणः सर्वव्यापकत्वविरोधः। सर्वव्यापकत्वं च ब्रह्मणः ब्रह्मणि आरोपितेषु अखिलेषु विषयेषु ब्रह्मणः अनुस्यूतत्वात्। उच्यते च शङ्कराचार्येण बृहदारण्यकोपनिद्भाष्ये – "तत्र च दर्शनविषये ब्रह्मणि न इह नाना अस्ति किञ्चन किञ्चिदपि; असति नानात्वे, नानात्वम् अध्यारोपयति अविद्यया" इति। तस्मात् अध्यासकारणादेव नानात्वप्रतीतिः भवति, न पारमार्थिकं नानात्वम् अस्ति। तेन उपनिषद्वाक्यानां विरुद्धार्थप्रतिपादकता अपि नास्ति, तदाश्रितानां वेदान्तग्रन्थानाम् अप्रामाण्यशङ्का अपि नापतति। अतोऽयमध्यासः अद्वैतवेदान्ततत्त्वालोचनप्रसङ्गे महद् गुरुत्वमावहति।

'अध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्च्यते' इत्येव उपदेशप्रक्रिया अद्वैतवेदान्ते। अपवादस्य अध्यारोपपूर्वकत्वात् आदौ अध्यारोपः प्रतिपादनीयः, तदनन्तरं च अध्यारोपितमिथ्याभूतविषयाणां निषेधो विधेयः। उच्यते च वेदान्तसारस्य बालबोधिनीटीकायाम् आपोदेवेन – 'अपवादस्य अध्यारोपपूर्वकत्वात् प्रथमम् अध्यारोपं निरूपयति' इति। अतोऽद्वैतवेदान्तविचारप्रसङ्गे आदावेव अध्यारोपापरपर्यायस्य अध्यासस्य विचारः कर्तव्य इति अध्यासप्रयोजनं स्पष्टम्।

१३.२) अध्यासपदार्थः

अधीत्युपसर्गपूर्वकाद् दिवादिगणीयात् अस् धातोः घञ्प्रत्यये अध्यासपदं निष्पद्यते। अधीत्यस्य उपरि इत्यर्थः। अस्-धातुः क्षेपणार्थे वर्तते, 'असु क्षेपणे' इति धातुपाठात्। घञ्-प्रत्ययः भावार्थे कर्मार्थे च वर्तते। एकस्य वस्तुनः उपरि - अपरस्य वस्तुनः (भ्रमवशात्) क्षेपणस्य, (भ्रमवशतः) क्षिप्तस्य अपरस्य वस्तुनो वा अध्यासपदेन ग्रहणं भवति व्युत्पत्तिवशात्। तथाहि, भावार्थे घञ्-प्रत्यये निष्पन्नस्य अध्यासपदस्य अर्थस्तावत् अध्यारोपणक्रिया। कर्मवाच्ये घञ्-प्रत्यये निष्पन्नस्य अध्यासपदस्य अध्यारोपितं वस्तु एवार्थः। यथा रज्जौ भ्रमवशात् यत् सर्पज्ञानं जायते तदपि अध्यासपदवाच्यम्, रज्जौ यस्य सर्पस्य ज्ञानं भवति सः सर्पोऽपि अध्यासपदवाच्यः। प्रथमस्य अध्यासस्य ज्ञानाध्यास इति द्वितीयस्य च अर्थाध्यास इति अभिधानम्। एतयोर्विचारः अग्रे विधास्यते।

पाठगतप्रश्नाः १

१. अद्वैतवेदान्तस्य प्रतिपाद्यविषयः कः।
२. अद्वैतवेदान्तशास्त्रस्य प्रयोजनं किम्।
३. कथं बन्धानां मिथ्यात्वम्।
४. कीदृशे विषये विचारः सम्भवति।
५. ब्रह्मणः कुतः सन्दिग्धत्वम्।
६. विधिमुखेन ब्रह्मप्रतिपादकानि श्रुतिवचनानि कानि।
७. निषेधमुखेन ब्रह्मप्रतिपादकानि श्रुतिवचनानि कानि।
८. अध्यासपदस्य का व्युत्पत्तिः।
९. अध्यासपदस्य व्युत्पत्तिगतः अर्थः कः।

१३.३) अध्यासलक्षणम्

'लक्षणप्रमाणाभ्यां वस्तुसिद्धिः न तूद्देशमात्रेण' इति शास्त्रनियमः। कस्यचिद् वस्तुनः सिद्धये तस्य लक्षणं, तल्लक्षणं लक्ष्ये अस्ति न वेति परीक्षार्थं प्रमाणं च अपेक्षितम्। किञ्च, पूर्वपक्षिण आक्षिपन्ति आत्मा अहमिति प्रत्यये विषयरूपेण भाषते, अनात्मा अहम्भिन्ने प्रत्यये; आत्मा विषयी भवति, अनात्मा तु

विषयः; अतः अत्यन्तभिन्नत्वात् आत्मानात्मनोः अध्यासो न सम्भवति इति। आत्मानात्मनोः अध्यासो यदि न स्वीक्रियते तर्हि परमात्मनः जीवत्वं कथञ्चिदपि प्रतिपादयितुं न शक्यते, तेन च बन्धमोक्षौ मोक्षोपयोगिनां शास्त्राणां प्रयोजनं च निरूपयितुं न शक्यन्ते। अतः अध्यासोऽस्ति इति प्रतिपादयितुम् आदौ अध्यासलक्षणं ततः तद्विषयकं प्रमाणं च आलोचनीयम्।

सदानन्दयोगीन्द्रप्रणीते वेदान्तसारे प्रतिपादितम् अध्यासलक्षणं हि – वस्तुनि अवस्त्वारोपः अध्यारोपः इति। अध्यासस्य उदाहरणं प्रस्तोतुमुक्तं तेन – असर्पभूतायां रज्जौ सर्पारोपवत् इति। वस्तुनि कस्मिंश्चित् पदार्थे अवस्तुनः तद्भिन्नस्य अपरस्य पदार्थस्य आरोपः अवभासः एव अध्यारोपः। उदाहरणे लक्षणसङ्गतिस्तु एवम् – वस्तुनि रज्जौ अवस्तुनः रज्जुभिन्नस्य सर्पस्य आरोपः अध्यारोपः इति। तथाहि वस्तुनि सच्चिदानन्दे ब्रह्मणि अवस्तुनः वस्तुभिन्नस्य ब्रह्मभिन्नस्य अज्ञानादिजडपदार्थानाम् आरोपः अवभास एव अध्यारोपः इत्यपि सिद्ध्यति। इदञ्च अध्यासस्य स्वरूपलक्षणं भवति। उक्तं च नृसिंहाश्रमाचार्येण पञ्चपादिकाविवरणस्य भावप्रकाशिकाटीकायां – 'परत्रावभास इत्यध्यासमात्रस्य स्वरूपलक्षणम्' इति।

अद्वैतवेदान्तसम्मतस्य अध्यासस्य इतरदर्शनसम्मताध्यासाद् विलक्षणता नानेन अध्यासलक्षणेन स्फुटा भवति। शङ्कराचार्येण ब्रह्मसूत्रभाष्यादौ अध्यासभाष्यं ग्रथितम्। तत्र प्रतिपादितेन अध्यासलक्षणेन स्वविलक्षणमतस्थापनम् अपरमतखण्डनं च सम्भवति। शङ्कराचार्येण विहितम् अध्यासलक्षणं हि - स्मृतिरूपः परत्र पूर्वदृष्टावभासः इति। पञ्चपादिकाविवरणे प्रकाशात्मयतिना ब्रह्मसूत्रशाङ्करभाष्यटीकायां भामत्यां च वाचस्पतिमिश्रेण लक्षणमिदं विस्तरेण आलोचितम्। तद्व्याख्यानद्वयं पृथक्तया सरलरूपेण इदानीं प्रस्तूयते।

वाचस्पतिमिश्रेण लक्षणस्य व्याख्यानमेवं विधीयते यत् – स्मृतेः रूपमिव रूपं यस्य सः स्मृतिरूपः। रूपं नाम स्वरूपम्। स्मृतेः स्वरूपं च असन्निहितविषयत्वम्। यदा कस्यचित् वस्तुनः स्मृतिः भवति तदा तद्वस्तु समीपे न तिष्ठति। परत्र इत्यस्य सद्वस्तुनि इत्यर्थः, परत्रपदेन आरोपस्य अधिष्ठानं निर्दिष्टम्। पूर्वदृष्टस्य अवभासः पूर्वदृष्टावभासः। पूर्वं दृष्टं पूर्वदृष्टम्। दृश्-धातोः यद्यपि दर्शनम् इत्यर्थः तथापि इह तस्य ज्ञानमित्येव अर्थः ग्रहणीयः। अतः पूर्वं ज्ञातस्य ज्ञानविषयीभूतस्येति यावत्। पूर्वदृष्टपदेन आरोपणीयस्य उल्लेखः कृतः। आरोपणीयं हि मिथ्या, अतः पूर्वदृष्टपदेन मिथ्याभूतस्य अनृतस्य एव निर्देशनं विहितम्। अवभासपदस्य द्विधा अर्थो विहितो भामतीकारेण। अवसन्नः अवमतो वा भासः अवभासः इति। भासो नाम ज्ञानम्। अवसादः उच्छेदः, उत्तरज्ञानेन बाधितः इति यावत्। अवमानः यौक्तिकतिरस्कारः। ज्ञानस्य तिरस्कारो नाम ज्ञानस्य इच्छा-प्रवृत्त्यादिकार्यसम्पादने अक्षमता। एवम् उत्तरज्ञानेन बाधितं, युक्त्या तिरस्कृतं वा ज्ञानम् अवभासपदस्य अर्थः। तेन च पूर्वदृष्टस्य पूर्वं ज्ञातस्य, परत्र तद्भिन्ने सद्वस्तुनि, स्मृतिरूपः असन्निहितविषयकः, अवभासः बाधितं तिरस्कृतं वा ज्ञानम् एव अध्यासः। असन्निहितविषयकः अवभासो नाम असन्निहितस्य विषयस्य अवभास इति। अतः असन्निहितस्य पूर्वदृष्टस्य विषयस्य परत्र तद्भिन्ने सद्वस्तुनि यः अवभासः यत् बाधितं तिरस्कृतं वा ज्ञानं सः अध्यास इत्यर्थः। पूर्वदृष्टपदेन इदम् आवेदितं यत् भ्रमे यः विषयः भासते सः अन्यत्र सत्यभूतः एव भवेत् इति नियमो नास्ति, तस्य वस्तुनः ज्ञानमात्रम् अपेक्षितम् अध्यासायेति।

वाचस्पतिमिश्रमते अवभासः इत्येव अध्यासस्य संक्षिप्तं लक्षणं भवति। अवभासपदेनैव मिथ्याज्ञानमुक्तं भवति। अवभासपदस्यार्थः अवसन्नः अवमतो वा भासः इति प्रतिपादितम्। पूर्वदृष्टेत्यादिपदेन संक्षिप्तलक्षणस्यैव व्याख्यानं परिष्कारश्च भवतः।

अत्र उदाहरणं तावत् शुक्तौ रजतम् इति ज्ञानम्। आपणे पूर्वं दृष्टस्य असन्निहितस्य रजतस्य रजतभिन्ने परत्र शुक्तौ अवभासः एव अध्यासः इति लक्षणसमन्वयः। इदं च रजतज्ञानम् परवर्तिनि काले अधिष्ठानस्य शुक्तेः दर्शनात् इदं न रजतम् इति ज्ञानेन बाधितं भवति।

लक्षणे स्मृतिरूपपदं प्रत्यभिज्ञायाम् अतिव्याप्तिवारणाय प्रदत्तम्। प्रत्यभिज्ञायां विषयः सन्निहितः भवति। तथाहि काश्यां देवदत्तं दृष्ट्वा दिल्ल्यां देवदत्तं पश्यन् कश्चन सोऽयं देवदत्तः इति ब्रूते। इदं च ज्ञानं प्रत्यभिज्ञा इत्युच्यते। देवदत्तः तदा वक्तुः प्रत्यक्षविषयः भवति। एवं परत्र प्रत्यक्षविषये देवदत्ते पूर्वदृष्टस्य काश्यां दृष्टस्य देवदत्तस्य यदभेदेन ज्ञानं तदपि अध्यासपदवाच्यं स्यात्। किञ्च, स्वस्तिमतीनामके गवि पूर्वं दृष्टस्य गोत्वस्य परत्र कालाक्षीनामके गवि यः यथार्थः अवभासः प्रत्यभिज्ञारूपः सोऽपि अध्यासः स्यात्। लक्षणे स्मृतिरूपपदप्रदानेन यथार्थज्ञानरूपायां प्रत्यभिज्ञायामतिव्याप्तिः वारिता, प्रत्यभिज्ञायां विषयस्य सन्निहितत्वात्। लक्षणे परत्रेति पदोपादानेन यथार्थज्ञाने अतिव्याप्तिः वारिता। रजते रजतस्य ज्ञानं यथार्थम् एव।

पञ्चपादिकाविवरणग्रन्थे प्रकाशात्मयतिः अध्यासस्य लक्षणं व्याख्यातवान्। तन्मते स्मृतिरूपपदस्य अर्थस्तावत् स्मृतेः रूपमिव रूपं यस्य सः इति। न हि भ्रमस्थले स्मृतिर्भवति। रूपं नाम स्वरूपमेव। स्मृतेः स्वरूपं चात्र कारणत्रितयजन्यत्वम्। कारणत्रयं च दोषः, संस्कारः सम्प्रयोगश्चेति। कालव्यवधानम् अमनोयोगः इत्यादयः दोषाः, पूर्वज्ञानजन्यः संस्कारः, सम्प्रयोगश्च इन्द्रियसन्निकर्षः। स्मृधातोः भावे कर्मणि च क्तिन्प्रत्यये स्मृतिपदस्य सिद्धिः। भावे क्तिन्प्रत्यये निष्पन्नस्य स्मृतिपदस्य स्मरणम् अर्थः, कर्मणि क्तिन्प्रत्यये निष्पन्नस्य स्मृतिपदस्य स्मर्यमाणं वस्तु अर्थः भवति। परत्र इत्यस्य अन्यत्र इत्यर्थः। पूर्वदृष्टस्य अवभासः पूर्वदृष्टावभासः। पूर्वदृष्टपदस्य अर्थस्तावत् पूर्वदृष्टसजातीयम् इति, न हि पूर्वदृष्टं वस्तु एव भ्रमस्थले भासते। अवभासपदस्य द्विधा व्युत्पत्तिः कल्पिता। तथाहि अवपूर्वकाद् भास्-धातोः भावे कर्मणि च घञ्प्रत्यये अवभासः इति। भावे घञ्प्रत्यये निष्पन्नस्य अवभासशब्दस्य ज्ञानम् इत्यर्थः। कर्मणि घञ्प्रत्यये निष्पन्नस्य अवभासशब्दस्य ज्ञानविषय इत्यर्थः। अतः अन्यत्र पूर्वदृष्टसजातीयस्य अन्यस्य कारणत्रितयजन्यः यः अवभासः सोऽध्यास इति लक्षणार्थः।

प्रकाशात्मयतिमते परत्र अवभासः इत्यनेनैव अध्यासस्य लक्षणं सम्भवति। परत्र इति कथनेन परस्य अवभासः इति आक्षेपात् सिध्यति। अतः परत्र परस्य अवभासः इत्येव अध्यासस्य लक्षणं भवितुमर्हति। तेन च परत्र शुक्तौ परस्य रजतस्य अवभासः अध्यासः इति सिध्यति। पूर्वदृष्ट-स्मृतिरूपेत्यादिपदं तस्यैव लक्षणस्य स्पष्टतायै संयोजितम्।

पाठगतप्रश्नाः २

१०. वेदान्तसारप्रतिपादितम् अध्यारोपलक्षणं किम्।

११. शङ्कराचार्यप्रतिपादितम् अध्यासलक्षणं किम्।

१२. भामतीकारमते अध्यासस्य संक्षिप्तं लक्षणं किम्।

१३. भामतीमते अवभासपदस्य कोऽर्थः।

१४. ज्ञानस्य अवसादो नाम किम्।

१५. ज्ञानस्य अवमानो नाम किम्।

१६. भामतीमते लक्षणस्थितस्य स्मृतिरूपपदस्य कोऽर्थः।

१७. अध्यासलक्षणस्थितं स्मृतिरूपपदं कुत्र अतिव्याप्तिं वारयति, कस्तत्र हेतुः।

१८. विवरणमते अध्यासस्य किं तावत् लघुलक्षणं भवितुमर्हति।

१९. विवरणमते स्मृतेः किं तावत् स्वरूपम्।

१३.४) अध्यासभेदाः

अध्यासो हि अर्थाध्यासो ज्ञानाध्यास इति द्विविधः। अध्यासकाले यथा विषयस्य अध्यासः भवति तथा ज्ञानस्यापि अध्यासः भवति। शुक्तौ यथा रजतस्य अध्यासः भवति तथा रजतज्ञानस्यापि अध्यासः सम्भवति। यदा शुक्तौ रजतस्य अध्यासो भवति तदा सः अध्यासः अर्थाध्यासः इति कथ्यते। यदा च शुक्तौ रजतज्ञानस्य अध्यासो भवति तदा स अध्यासो ज्ञानाध्यास इति कथ्यते। विवरणकारेण अर्थाध्यासे ज्ञानाध्यासे च अध्यासलक्षणस्य समन्वयः प्रदर्शितः। तथाहि परत्र शुक्तौ पूर्वदृष्टस्य पूर्वदृष्टसजातीयस्य रजतस्य स्मर्यमाणसदृशस्य अवभासमानस्य विषयस्य अध्यासपदेन ग्रहणात् अर्थाध्यासे लक्षणसङ्गतिः। किञ्च, परत्र शुक्तौ पूर्वदृष्टस्य पूर्वदृष्टसजातीयस्य स्मृतिरूपः स्मरणसदृशः यः अवभासः ज्ञानं सोऽध्यास इति ज्ञानाध्यासे लक्षणसङ्गतिः। उक्तं च प्रकाशात्मयतिना पञ्चपादिकाविवरणे – "यदा ज्ञानविशिष्टोऽर्थ एवाध्यासः, तदा स्मर्यमाणसदृशः अन्यात्मना अवभासमानः अन्यः अर्थः अध्यास इत्येवंलक्षणपरतया वाक्यं योजितम्। यदा पुनरर्थविशिष्टं ज्ञानमेवाध्यासः, तदा स्मृतिसमानोऽन्यस्यान्यात्मनावभासः अध्यासः इत्येवंलक्षणपरतयापि तदेव वाक्यं योजयितुं शक्यते" इति। एवं भामतीमतेऽपि अवभासपदस्य भावे कर्मणि च द्विधा व्युत्पत्तिमङ्गीकृत्य अर्थाध्यासे ज्ञानाध्यासे च अध्यासलक्षणस्य समन्वयः सम्भवति।

अयम् अर्थाध्यासः धर्म्यध्यासः धर्माध्यासः सम्बन्धाध्यासश्चेति त्रिधा विभज्यते। एकस्मिन् धर्मिणि अपरस्य धर्मिणः अध्यासो हि धर्म्यध्यासः। यथा धर्मिणि शुक्तौ अपरस्य धर्मिणः रजतस्य आरोपो हि धर्म्यध्यासः। यथा वा आत्मनि अन्तःकरणस्य आरोपो हि धर्म्यध्यासः। एकस्मिन् धर्मिणि अपरस्य धर्मिणः धर्मस्य अध्यासः धर्माध्यास इति उच्यते। यथा धर्मिणि रज्जौ धर्मिणः सर्पस्य विषयुक्तत्वधर्मस्य अध्यासो हि धर्माध्यासः। यथा वा आत्मधर्मचैतन्यस्य अन्तःकरणे आरोपो हि धर्माध्यासः। यदा एकस्मिन् धर्मिणि न हि धर्मिणः न वा धर्मस्य किन्तु केवलं सम्बन्धमात्रस्य आरोपो भवति तदा स

सम्बन्धाध्यास इत्युच्यते। यथा आत्मना सह सम्बन्धहीनस्य शरीरस्य आत्मना सह सम्बन्धमात्रम् आरोप्यते। तस्माच्च मम शरीरम् इति भ्रमज्ञानं भवति।

अर्थाध्यासः पुनः तादात्म्याध्यासः संसर्गाध्यासः इति द्विधा इति केचन कथयन्ति। आत्मनि यदा कस्यचित् अनात्मवस्तुनः अभेदेन आरोपो भवति तदा सः तादात्म्याध्यास इति कथ्यते। स्वरूपाध्यास इत्यस्यापरं नाम। तथाहि आत्मनि इन्द्रियाणाम् आरोपे सति अहं पश्यामि अहं शृणोमि इत्येवं ज्ञानमुत्पद्यते। यदा च आत्मनि न हि अनात्मवस्तुनः किन्तु तत्संसर्गस्य केवलम् आरोपः भवति तदा सः संसर्गाध्यास इति कथ्यते। तथाहि न आत्मनि यदा पुत्रसंसर्गस्य आरोपः भवति तदा मम पुत्रः इति भ्रमज्ञानं जायते। आत्मनि न हि अत्र आत्मनि पुत्रस्य आरोपो भवति, अन्यथा अहं पुत्रः इति तादात्म्याध्यासः स्यात्, अत्र पुत्रेण सह आत्मनः अविद्यमानस्य सम्बन्धस्य केवलम् आरोपः भवति। अहंकारेण तादात्म्याध्यासस्य ममकारेण च संसर्गाध्यासस्य निर्देशो भवति। उभयविधम् अध्यासम् अङ्गीकृत्य शङ्कराचार्येण उच्यते – अहमिदं ममेदमिति नैसर्गिकोऽयं लोकव्यवहारः इति।

सोपाधिकनिरुपाधिकभेदेनाध्यासो द्विविधः। यस्मिन् अध्यासे कारणरूपेण कश्चित् उपाधिः वर्तते सः सोपाधिकः अध्यासः। यथा द्विचन्द्रदर्शनरूपभ्रमे अङ्गुलीव्यापारः उपाधिः, अतः द्विचन्द्रदर्शनं सोपाधिकः अध्यासः। यथा वा एकस्यैव ब्रह्मणः अन्तःकरणरूपोपाधिकारणात् जीवभ्रमः। सोपाधिकाध्यासे न हि अधिष्ठानज्ञानमात्रेण अध्यासो निवर्तते, उपाधिनाशेन एव अध्यासस्य निवृत्तिर्भवति। यस्मिन् अध्यासे कारणरूपेण उपाधिः न वर्तते स निरुपाधिकः अध्यासः। यथा शुक्तौ रजतम् इति ज्ञानम्। अयञ्चाध्यासः शुक्तिरूपाधिष्ठानदर्शनेन बाधितो भवति। अध्यासस्य उदाहरणप्रदानकाले शङ्कराचार्यः उभयविधमध्यासमेव उदाहरति – "यथा च लोकेऽनुभवः शुक्तिका हि रजतवदवभासते, एकश्चन्द्रः सद्वितीयवदिति" इति।

अध्यासोऽयं साद्यनादिभेदेन पुनर्द्विविधः। आत्मनि अविद्यायाः अध्यासः अनादिः, अनादिकालतः एव अयमध्यासः विद्यमानः अस्ति। चित्सुखाचार्यः तत्त्वप्रदीपिकायाम् षड् अनादीन् अङ्गीकृतवान्; ते हि जीवः, ईश्वरः, विशुद्धं चैतन्यं, जीवेश्वरोर्भेदः, अविद्या, अविद्या-चैतन्ययोः सम्बन्धश्चेति। उक्तञ्च तेन –

जीव ईशो विशुद्धा चित् तथा जीवेशयोर्भिदा।
अविद्या तच्चितोर्योगः षडस्माकमनादयः॥ इति।

शुक्तिरज्वादिषु रजतसर्पादीनाम् अध्यासः सादिः, यतः ते अध्यासा उत्पद्यन्ते। परन्तु उभयविधोऽपि अध्यासः ज्ञानोदये सति बाधितो भवति।

पाठगतप्रश्नाः ३

२०. अध्यासः कतिविधः।

२१. कः अर्थाध्यासः।

२२. कः ज्ञानाध्यासः।

२३. अर्थाध्यासः कतिविधः।

२४. कः सम्बन्धाध्यासः, किं च तदुदाहरणम्।

२५. कः धर्म्यध्यासः, किं च तदुदाहरणम्।

२६. कः धर्माध्यासः किं च तदुदाहरणम्।

२७. उपाधिदृष्ट्या अध्यासो कतिविधः।

२८. कः सोपाधिकः अध्यासः, किं च तदुदाहरणम्।

२९. सोपाधिकाध्यासे कथमध्यासनिवृत्तिर्भवति।

३०. को निरुपाधिकाध्यासः, किं च तस्योदाहरणम्।

३१. कः सादिरध्यासः, कि च तस्योदाहरणम्।

३२. कोऽनादिरध्यासः, किं च तत्रोदाहरणम्।

१३.५) लौकिकशास्त्रीयव्यवहाराणाम् आध्यासिकत्वम्

लौकिकाः वैदिकाश्च प्रमाणप्रमेयव्यवहाराः अध्यासकारणादेव सम्भवन्ति। विधिप्रतिषेधमोक्षपराणि शास्त्राणि अध्यासपूर्वकमेव प्रवर्तन्ते। तथाहि देहेन्द्रियादिषु अहंममाभिमाने सति निर्गुणः असङ्गः आत्मा प्रमाता भवति। प्रमाता च शरीरम् अधिष्ठाय इन्द्रियाणि व्यापारयति। तेन प्रत्यक्षादिज्ञानम् उत्पद्यते। देहेन्द्रियादिषु आत्मनः अध्यासं विना आत्मा प्रमाता न भवति, आत्मा प्रमाता न भवति चेत् ज्ञानमपि न उत्पद्यते। अतः सर्वोऽपि प्रमाणप्रमेयव्यवहारः अध्यासपूर्वकः एव। प्राकृतात् जनाद् आरभ्य पण्डिताः सर्वेऽपि अध्यासपूर्वकम् एव व्यवहरन्ति लोके। तथाहि लोके गवादिपशवः यदा दण्डधारिणं पुरुषम् आगच्छन्तं पश्यन्ति तदा ते माम् अयं हन्तुमिच्छतीति विज्ञाय पलायन्ते, हरिततृणधारिणं पुरुषं प्रति च प्रवर्तन्ते। एवं पण्डिता अपि हिंस्रदृष्टिं खण्डधारिणं बलवन्तं पुरुषम् आगच्छन्तं वीक्ष्य ततः पलायन्ते, तद्विपरीतान् प्रति च प्रवर्तन्ते। अतः पश्वादिभिः पुरुषाणां प्रमाणप्रमेयव्यवहारकाले नैव भेदः दृश्यते, पशूनां पण्डितानां च व्यवहारः अध्यासपूर्वक एव। देहे आत्माध्यासं विना अहं म्रिये इति बोध एवात्र न उदीयात्।

कर्मकाण्डान्तर्गतं ज्ञानकाण्डान्तर्गतं वा शास्त्रमपि अध्यासमाश्रित्य एव प्रवृत्तम्। तथाहि, आत्मनि ब्राह्मणादिवर्णानाम् गृहस्थाद्याश्रमाणां बालयुवकादिवयसाम् व्याधिग्रस्तत्वाद्यवस्थानाम् अध्यासं कृत्वा एव एतानि शास्त्राणि प्रवृत्तानि भवन्ति। वर्णाध्यासो यथा – ब्राह्मणो यजेत इति, आश्रमाध्यासो यथा – गृहस्थः सदृशीं भार्यां विन्देत् इति, वयोऽध्यासो यथा – अष्टवर्षं बालकमुपनयीत इति, अवस्थाध्यासो यता – अप्रतिसमाधेयव्याधीनां जलादिप्रवेशेन प्राणत्यागः इति च। यद्यपि कर्मकाण्डे देहातिरिक्तः आत्मा अङ्गीक्रियते तथापि उपनिषत्सु प्रतिपादितः नित्यशुद्धबुद्धमुक्तस्वभाव आत्मा न तत्र विधेः विषयो भवति। ज्ञानकाण्डे च आध्यासिकं जीवत्वं पुरस्कृत्य तस्य जीवस्य मुक्त्यर्थम् एव शास्त्राणां

प्रवृत्तिः भवति। जीवत्वं जीवस्य बन्धः इत्यादिविषया अध्यासकारणादेव सिध्यन्ति। अतः सर्वे लौकिकव्यवहाराः सर्वाणि च शास्त्राणि अविद्यापूर्वकमेव प्रवृत्तानि भवन्ति।

प्रत्यगात्मनि देहान्तःकरणादीनाम् अनात्मनाम् अध्यासपुरःसरमेव लोकव्यवहाराः सम्भवन्ति। तथाहि आत्मनि बाह्यधर्मान् अध्यस्य पुत्रे नष्टे मृते च अहमेव मृतो नष्टो वेति मन्यते जीवः। एवं देहधर्मान् आत्मनि अध्यस्य अहं स्थूलः, अहं गौरः, अहं गच्छामि, अहं लङ्घयामि इति; इन्द्रियधर्मान् आत्मनि अध्यस्य अहं मूकः, अहं काणः, अहं बधिरः, अहम् अन्धः इति; तथा अन्तःकरणधर्मान् आत्मनि अध्यस्य अहं कामये, अहं सङ्कल्पयामि इति व्यवहाराः दरीदृश्यन्ते लोके। आत्मनि अनात्मनाम् अध्यासः एव सर्वानर्थहेतुः, न हि शुक्तिरजतादिविभ्रमाः। अतः अस्य सकलस्य अनर्थस्य हेतोः अध्यासस्य दूरीकरणाय एव सर्वा उपनिषदः प्रवृत्ताः, तदनुयायि अद्वैतवेदान्तशास्त्रं च प्रवृत्तम्।

पाठगतप्रश्नाः ४

३३. कथं निर्गुणः असङ्गः आत्मा प्रमाता भवति।

३४. शास्त्राणां कथमाध्यासिकत्वम्।

३५. वर्णाध्यासोपेतं विधिवाक्यं किम्।

३६. आश्रमाध्यासयुक्तं शास्त्रवाक्यमुदाहरत।

३७. अन्तःकरणधर्मान् आत्मनि आरोप्य के व्यवहारा भवन्ति।

३८. सर्वानर्थहेतुरध्यासो कः।

पाठसारः

वेदान्तशास्त्रस्य जीवब्रह्मैक्यरूपविषयस्य मोक्षरूपप्रयोजनस्य च सिद्धये अध्यासस्य आलोचनमपेक्षितम्। जीवत्वं हि ब्रह्मणः अध्यासकारणाद् भवति। अतो जीवब्रह्मणोः भेदः मिथ्या, जीवब्रह्मणोः वास्तविको भेदो नास्ति।एवं ब्रह्मणि कर्तृत्वभोक्तृत्वादिबन्धः अध्यासकारणादेव कल्पितः भवति। अतो मिथ्याभूतः बन्धः ब्रह्मज्ञाने सति नश्यति इति सिध्यति। एवं अध्यासकारणाद् अद्वैतवेदान्तस्य विषयस्य प्रयोजनस्य च सिद्धिर्भवति। अधीत्युपसर्गपूर्वकाद् दिवादिगणीयात् अस् धातोः घञ्प्रत्यये निष्पन्नः अध्यासशब्दः निष्पद्यते। अत्र भावे घञ्प्रत्ययश्चेत् अध्यासपदस्यार्थः आरोपक्रिया, कर्मणि घञ्प्रत्ययश्चेत् अध्यासपदं आरोप्यपदार्थम् अभिधत्ते।

अध्यासस्य लक्षणं तावत् स्मृतिरूपः परत्र पूर्वदृष्टावभासः इति शङ्कराचार्येण विहितम्। भामतीकारः अवभासः इत्येव अध्यासस्य लक्षणं सम्भवतीति मन्यते। अवसन्नः अवमतो वा भासः अवभासः इति तदीयव्याख्यानम्। स्मृतिरूपपदस्य असन्निहितविषय इत्यर्थः, पदेनानेन प्रत्यभिज्ञायाम्

अतिव्याप्तिर्वारिता भवति। परत्रेति पदेन यथार्थज्ञाने अतिव्याप्तिर्वारिता भवति। पूर्वदृष्टपदेन च आरोपणीयस्य उल्लेखात् तस्य मिथ्यात्वं ज्ञायते। विवरणकारमते हि परत्रावभास इत्येव लक्षणम् अध्यासस्य, इतरपदानि लक्षणस्य स्पष्टार्थमुपात्तानि। तत्र स्मृतिरूपशब्दस्य स्मर्यमाणसदृशः इत्यर्थः, परत्रेत्यस्य स्वभिन्ने इत्यर्थः, पूर्वदृष्टपदस्य च पूर्वदृष्टसजातीयम् इत्यर्थः। अवभासपदस्य च ज्ञानं ज्ञेयः वार्थः।

अयञ्च अध्यासो ज्ञानाध्यासः अर्थाध्यासः इति द्विधा। तथाहि परत्र शुक्तौ पूर्वदृष्टस्य पूर्वदृष्टसजातीयस्य रजतस्य स्मर्यमाणसदृशस्य अवभासमानस्य विषयस्य अध्यासपदेन ग्रहणात् अर्थाध्यासे लक्षणसङ्गतिः। किञ्च, परत्र शुक्तौ पूर्वदृष्टस्य पूर्वदृष्टसजातीयस्य स्मृतिरूपः स्मरणसदृशः यः अवभासः ज्ञानं सोऽध्यास इति ज्ञानाध्यासे लक्षणसङ्गतिः। धर्म्यध्यासः धर्माध्यासः सम्बन्धाध्यासश्चेति त्रिधा अर्थाध्यासो विभज्यते। अर्थाध्यासः पुनः तादात्म्याध्यासः संसर्गाध्यासः इति द्विधा इति केचन कथयन्ति। सोपाधिकनिरुपाधिक-भेदेनाध्यासो पुनर्द्विविधः। साद्यनादिभेदेनापि अध्यासद्वैविध्यं विद्वांसः कल्पयन्ति।

सर्वविधाः लौकिकवैदिकव्यवहाराश्च अध्यासकारणादेव भवन्ति। तथाहि देहेन्द्रियादिषु ब्रह्मणः अध्यासे सति ब्रह्मणः प्रमातृत्वं सिध्यति। ब्रह्मणः प्रमातृत्वे सिद्धे प्रमाणप्रवृत्तिर्भवति, तेन च ज्ञानं सम्भवति। अतः सर्वविधलौकिकव्यवहारः अध्यासकारणादेव भवति। पण्डितानां मूर्खानां पशूनां सर्वेषां लौकिकः प्रमाणप्रमेयव्यवहारः अध्यासपूर्वक एव। शास्त्रीयव्यवहारोऽपि ब्रह्मणि वर्णाश्रमवयोऽवस्थादिविशेषाध्यासम् आश्रित्य एव प्रवर्तन्ते। अतः लौकिकवैदिकव्यवहाराणाम् आध्यासिकत्वम्।

पाठान्तप्रश्नाः

१. चत्वारः पुरुषार्थाः के।

२. अद्वैतवेदान्तस्य प्रतिपाद्यविषयाणां सारः कः।

३. कथं ब्रह्मणः शुद्धत्वम्।

४. ब्रह्मणः आनन्दस्वरूपत्वं कुतः।

५. का नाम मुक्तिः।

६. बन्धस्य मिथ्यात्वप्रतिपादिका श्रुतिः का।

७. किं नाम असत्, किं च तत्रोदाहरणम्।

८. ब्रह्मणि नानात्वप्रतीतौ को हेतुः।

९. षट् अनादयः के।

१०. वयोऽध्यासस्य किमुदाहरणम्।

११. अवस्थाध्यासस्य किमुदाहरणम्।

पाठगतप्रश्नानामुत्तराणि

पाठगतप्रश्नाः १

१. अद्वैतवेदान्तस्य प्रतिपाद्यविषयो हि जीवब्रह्मणोरैक्यम्।

२. अद्वैतवेदान्तशास्त्रस्य प्रयोजनं तावत् मोक्षः।

३. ब्रह्मणि आरोपितत्वात् जीवस्य स्वस्वरूपज्ञाने सति बन्धानां निवृत्तेः बन्धानां मिथ्यात्वम्।

४. सन्दिग्धे सप्रयोजने एव विषये विचारः सम्भवति।

५. देहेन्द्रियादिभिः अभिन्नतया ब्रह्म सामान्यतो ज्ञायते। परन्तु सर्वोपाधिविनिर्मुक्ततया ब्रह्मणो विशषज्ञानं जीवानां नास्ति। अतो ब्रह्मणः सन्दिग्धत्वम्।

६. सत्यं ज्ञानमनन्तं ब्रह्म, सर्वं खल्विदं ब्रह्म, सच्चिदानन्दं ब्रह्म इत्यादीनि उपनिषद्वाक्यानि।

७. नेह नानास्ति किञ्चन, अशब्दमस्पर्शमरूपमव्ययम्, अवाङ्गनसगोचरम् इत्यादीनि श्रुतिवचनानि निषेधमुखेन ब्रह्म प्रतिपादयन्ति।

८. अधिपूर्वकाद् दिवादिगणीयाद् अस् धातोः भावे कर्मणि वा घञ्-प्रत्यये अध्यासपदं निष्पद्यते।

९. भावव्युत्पत्या अध्यासपदस्य आरोपक्रिया इत्यर्थः, कर्मव्युत्पत्या च अध्यासपदस्य अध्यारोपितं वस्तु इत्यर्थः।

पाठगतप्रश्नाः २

१०. असर्पभूतायां रज्जौ सर्पारोपवत् वस्तुनि अवस्त्वारोपः अध्यारोप इति।

११. स्मृतिरूपः परत्र पूर्वदृष्टावभासः इति।

१२. अवभासः इत्येव भामतीकारमते अध्यासस्य संक्षिप्तं लक्षणम्।

१३. अवसन्नः अवमतो वा भासः अवभास इति।

१४. ज्ञानस्य अवसादो नाम ज्ञानस्य उच्छेदः उत्तरज्ञानबाध्यत्वं वा।

१५. ज्ञानस्य अवमानो नाम यौक्तिकतिरस्कारः। इच्छाप्रवृत्यादिकार्यसम्पादने अक्षमता एव ज्ञानस्य तिरस्कारः।

१६. असन्निहितविषय इत्यर्थः।

१७. प्रत्यभिज्ञायाम् अतिव्याप्तिं वारयति, प्रत्यभिज्ञायां विषयस्य सन्निहितत्वात्।

१८. विवरणमते परत्र अवभासः इत्येव अध्यासस्य लघुलक्षणं भवितुमर्हति।

१९. दोषः संस्कारः सम्प्रयोगश्चेति कारणत्रितयजन्यत्वमेव स्मृतेः स्वरूपम्।

पाठगतप्रश्नाः ३

२०. अध्यासो द्विविधः अर्थाध्यासः ज्ञानाध्यासश्चेति।

२१. अधिष्ठाने आरोप्यवस्तुनः हि अर्थाध्यासः। यथा शुक्तौ रजतस्य अध्यासो हि अर्थाध्यासः।

२२. अधिष्ठाने आरोप्यवस्तुनः ज्ञानस्य अध्यासो हि ज्ञानाध्यासः। यथा शुक्तौ रजतज्ञानस्य

अध्यासो हि ज्ञानाध्यासः।

२३. धर्म्यध्यासः धर्माध्यासः सम्बन्धाध्यासश्चेति अर्थाध्यासः त्रिविधः। तादात्म्याध्यासः संसर्गाध्यासश्चेति अर्थाध्यासद्वैविध्यमपि केचन कथयन्ति।

२४. एकस्मिन् धर्मिणि सम्बन्धमात्रस्य आरोपो हि सम्बन्धाध्यासः। यथा आत्मनि सम्बन्धहीनस्य शरीरस्य सम्बन्धम् अध्यस्य भवति प्रयोगः मम शरीरम् इति।

२५. एकस्मिन् धर्मिणि अपरस्य धर्मिणः अध्यासो हि धर्म्यध्यासः। यथा शुक्तौ रजतस्य अध्यासः।

२६. एकस्मिन् धर्मिणि अपरस्य धर्मिणो धर्मस्य अध्यासो हि धर्माध्यासः। यथा रज्जौ धर्मिणः सर्पस्य विषययुक्तत्वधर्मस्य अध्यासो हि धर्माध्यासः।

२७. उपाधिदृष्ट्या अध्यासो द्विविधः सोपाधिकः निरुपाधिकश्चेति।

२८. यस्मिन् अध्यासे कारणरूपेण कश्चित् उपाधिः वर्तते सः सोपाधिकः अध्यासः। यथा द्विचन्द्रदर्शनं सोपाधिकः अध्यासः। अङ्गुलीव्यापारस्तत्र उपाधिः।

२९. सोपाधिकाध्यासः न केवलम् अधिष्ठानज्ञानमात्रेण निवर्तते, उपाधिनाशेन एवात्र अध्यासस्य निवृत्तिर्भवति।

३०. यस्मिन् अध्यासे कारणरूपेण कश्चिद् उपाधिः न वर्तते स निरुपाधिकः अध्यासः। यथा शुक्तौ रजतम् इति ज्ञानम्।

३१. यस्य अध्यासस्य उत्पत्तिर्निरूपयितुं शक्यते स सादिरध्यासः। यथा शुक्तौ रजतस्य अध्यासः सादिः।

३२. यस्य अध्यासस्य आदिर्निरूपयितुं न शक्यते सः अनादिः अध्यासः। यथा आत्मनि अविद्यायाः अध्यासः अनादिः।

पाठगतप्रश्नाः ४

३३. देहेन्द्रियादिषु अहंममाभिमाने सत्येव असङ्गः आत्मा प्रमाता भवति।

३४. आत्मनि वर्णाश्रमवयोऽवस्थादिविशेषाध्यासमाश्रित्य एव शास्त्राणां प्रवृत्तिदर्शनात् शास्त्राणाम् आध्यासिकत्वम्।

३५. ब्राह्मणो यजेत, राजा राजसूयेन यजेत इत्यादीनि।

३६. गृहस्थः सदृशीं भार्यां विन्देत् इति।

३७. अहं कामये, अहं सङ्कल्पयामि इत्यादयः।

३८. आत्मनि अनात्माध्यास एव सर्वानर्थहेतुः।

॥ इति त्रयोदशः पाठः ॥